त्रि० "रुद्र! यत्ते क्रिविपरं नाम" यजु० १०।२०। ४असुरभेदे "अभ्योजसा क्रिविं युधाः" ऋ० २,२२,२, "क्रिविं नामासुरम्" भा०। ५पञ्चालदेशे पु० व० व०। "आप्नोर्यामोऽतिरात्रस्तेन हैतेन क्रैव्यः पञ्चालो राजा" "क्रिवय इति ह वै पुरा पञ्चालानाचक्षते" शत० ब्रा० १२, ५,४,७, [ क्रिविर्दती" ऋ० १,१६६,६,

क्रिविस् त्रि० क्रवि—इसु नि०। हिंसके "यत्रा वोदिद्युद्रदति

क्री क्रये (मूल्यदानेन द्रव्यग्रहणे) क्र्या० उभ०सक०अनिट्। क्रीणाति क्रीणीते अक्रैषीत् अक्रेष्ट। चिक्राय चिक्रिये क्रेतव्यः क्रयणीयः क्रेयः क्रय्यार्थे प्रसारिते क्रय्यः क्रायकः क्रेता क्रीणन् क्रीणानः। क्रीतः क्रीत्वा विक्रीय। क्रेतुम्। कर्म्मणि क्रीयते अक्रायि आक्रयिषाताम्—अक्रेषाताम्। चिक्रिये। "कइमं दशभिर्ममेन्द्रं, क्रीणाति धेनुभिः" ऋ० ४,२४,१०, "शुक्रं त्वा शुक्रेण क्रीणामि" यजु० ४,२६,। "क्रीणीयाद्यस्त्वपत्यार्थं मातापित्रोर्यमन्तिकात्" मनुः "कच्चित् सहस्रैर्मूर्खाणामेकं क्रीणासि पण्डितम्" भा०स० कच्चिदध्यायः। "सोमं राजानमक्रीणंस्तस्मात् प्राच्यां दिशि क्रीयते" ऐत० १,१२, "म्लूद्रानीतैः क्रयक्रीतैः (जलैः) कर्म्म कुर्व्वन् पतत्यधः" स्मृतिः। अनुशयशब्दे उदा०।

अप+मूल्यादिदानेन वशनयने। "सा चेदस्मै न दद्यात् काममेनामपक्रीणीयात्" शत० ब्रा० १४,६,४,७, "तदा एनां स्वपत्नीं वस्त्राभरणभोग्यादिदानेन कामं यथाशक्तिवैभवमपक्रीणीयात् वशं नयेत्" भा०।

अभि+अभिलक्ष्यीकृत्य विक्रये संस्कारविशेषे च। "एकं वा एष क्रीययाणोऽभिक्रीयते छन्दसामेव राज्याय" शत० ब्रा० ३,३,२,२, "एषः क्रीयमाणः क्रयेण सम्पाद्यमागः सोमः एकं वै एकं खलु प्रयोजनमभिलक्ष्य विक्रीयते, अभिषवादिना स्वात्मना संस्क्रियते वा" भा०।

अव+धनादिना वशनयने। "ब्राह्मणं क्षत्रियं वा सहस्रेण शताश्वेनावक्रीय" सांख्य० श्रौ०सू० १५,१०,१०,

आ+ ईषत्क्रये। "भार्य्यां शुल्काक्रीताम्" दशकुमा०

उप+सामीप्येन क्रये। "घटादीनुपक्रीय" हितो०।

निस्+(र्) विक्रये क्रयानुरूपमूल्यदाने च। "न निष्क्रयविसर्गाभ्यां भर्त्तुर्भार्य्या विमुच्यते" मनुः। "निष्क्रयो-विक्रयः" उ०त०रघु०। "भोः केशव! मदीयस्त्वमद्भिर्दत्तोऽसि सत्यया। स त्वं मामनुगच्छस्व कुरुष्व यद्ब्रवीम्यहम्। प्रथमः कल्प इत्येवमब्रवीन् मधुसूदनः। व्रजन्तमनुवव्राज नारदस्तु जनार्द्दनः। परिहासान् बहुविधान् कृत्वा मुनिवरस्ततः। तिष्ठस्व गच्छामीत्युक्ता परिहासविचक्षणः। अपनीय ततः कण्ठात् पुष्पदामैनमब्रवीत्। कपिलां गां सवत्सां मे निष्क्रयार्थं प्रयच्छ मे। तिलं कृष्णाजिनं स्वूर्णं प्रयच्छ तप्तकाञ्चनम्। एषोऽत्र निष्क्रयः कृष्ण! विहितो वृषकेतुना" हरि० १२५अ० २निष्कृतौ। "तपोदानोपहारेषु व्रतेषु नियमेषु च। इज्याध्यायनधर्म्मेषु योनाऽऽसक्तः स निष्क्रयः" वसिष्ठः

परि+नियतकालं भृत्या स्वीकारे अनियतकालस्वत्वोत्पादकात् क्रयात् तस्य नियतकालत्वेन न्यूनता। तद्योगे करणस्य वा सम्प्रदानसंज्ञा। "शतेन शताय वा परिक्रीतः" सि०कौ०। "सम्भोगाय परिक्रीतः कर्त्तास्मि तव नाप्रियम्" भट्टिः "भक्त्यै मुक्तिः परिक्रीता सद्भिर्विष्णोरुषाऽरिभिः" मुग्ध०। "कृतेनोपकृतं वायोः परिक्रीणानमुत्थितम्" भट्टिः। क्रयशब्दे २२०५ पृ० दर्शितम् जै० सूत्रवाक्यादि उदा०।

वि+मूल्यग्रहणेन स्वस्वत्वध्वंसपरस्वत्वापादकव्यापारे "वस्नेव विक्रीणावहा इषमूर्ज्जं शतक्रतो!" यजु०३,४९, विक्रीणीते परस्य स्वं योऽस्वामी स्वाम्यसम्मतः" मनुः अनुशयशब्दे भूरि उदा०।

सम्+सम्यक् क्रये "न च मे विद्यते वित्तं संक्रेतुं पुरुषं क्वचित्" भा० आ० १६०अ०।

"परिव्यवेभ्यः क्रियः" पा०

अकर्त्तृगामिन्यपि क्रियाफले तङ्।

क्री त्रि० क्री—क्विप्। क्रेतरि कारकोपदत्वेऽपि संयोगोपधत्वात् न यण्, किन्तु इयङ्। यवक्रियौ यवक्रिय इत्यादि।

क्रीड़ खेलने भ्वा० पर० अक० सेट्। क्रीडति अक्रीडीत्। चिक्रीड क्रीडिता। क्रीडितव्यः क्रीड्यः क्रीडकः क्रीडिता। क्रीडः। क्रीडा। क्रीडितः। क्रीडनं क्रीडितम्। क्रीडित्वा विक्रीड्य। "एष सोमो अधित्वचि गवां क्रीडत्यद्रिभिः" ऋ० ९,६६,२६, "माता च पिता च तेऽग्रे वृक्षस्य क्रीडतः" यजु० २३,२५, चिक्रीड चैव प्रजहास चैव" भा० व० १०४२श्लो० "क्रीडारसं निर्विशतीव बाल्ये" कुमा०। अस्मादर्षे प्रयोगे तङपि दृश्यते। ब्रह्मशङ्करशक्राद्यैर्देववन्द्यैः पुनः पुनः। क्रीडसे त्वं नरव्याघ्र! बालः क्रीडनकैरिव" भा० व० ५०४श्लो०

अन्वाद्युपसर्गे तत्तद्द्योत्यार्थविशिष्टे क्रीडने तत्र "क्रीडोऽनुसंपरिभ्यश्च" पा०एभ्यः चकारात् आङश्च तङ् "साध्वनुक्रीडमानानि पश्य द्वन्द्वानि पक्षिणाम्" भट्टिः। "आक्रीडमानोहृष्टात्मा भीमान् वायुसुतोयथौ" भा० व०